वेदान्तिमते अविद्याकल्पितदेहादिप्रपञ्चनिवृत्तौ स्वाद्वितीयब्रह्मभावापत्तिरूपे कैवल्ये च। तच्च कैवल्यं द्विविधं जीवन्मुक्तिर्विदेहकैवल्यञ्च। तत्र जीवन्मुक्तिलक्षणम् विस्तरेण जीवन्मुक्तशब्दे वक्ष्यते दिङ्मात्रमत्राभिधीयते तत्र विवेकचूड़ामणौ जीवन्मुक्तलक्षणमुक्तोक्तं यथा

"विज्ञातब्रह्मतत्त्वस्य यथापूर्वं न संसृतिः। अस्ति चेन्न स विज्ञातब्रह्मभावो बहिर्मुखः। प्राचीनवासनावेगादसौ संसरतीति चेत्। न सदेकत्वविज्ञानान्मन्दीभवति वासना। अत्यन्तकामुकस्यापि वृत्तिः कुण्ठति मातरि। तथैव ब्रह्मणि ज्ञाते पूर्णानन्दे मनीषिणः। निदिध्यासनशीलस्य बाह्यप्रत्ययदृश्यते। ब्रवीति श्रुतिरेतस्य प्रारब्धफलदर्शनात्। सुखाद्यनुभवो यावत्तावत् प्रारब्धमिष्यते। फलोदयः क्रियापूर्वो निष्क्रियो न हि कुत्रचित्?। अहंब्रह्मेति विज्ञानात् कल्पकोटिशतार्जितम्। सञ्चितं विलयं याति प्रबोधात् स्वप्नकर्म्मवत्। यत् कृतं स्वप्नवेलायां पुण्यं वा पापमुल्वणम्। सुप्तोत्थितस्य किं तत् स्यात्? स्वर्गाय नरकाय वा। स्वमसङ्गमुदासीनं परिज्ञाय नभो यथा। न श्लिष्यति च यत्किञ्चित् कदाचिद्भाविकर्म्मभिः। न नभो घटयोगेन सुरागन्धेन लिप्यते। तथात्मोपाधियोगेन तद्धर्मैर्नैव लिप्यते। ज्ञानोदयात् पुराऽऽरब्धं कर्म ज्ञानान्न नश्यति। अदत्त्वा स्वफलं लक्ष्यमुद्दिश्योत्सृष्टवाणवत्। व्याघ्रबुद्ध्या विनिर्मुक्तो वाणः पश्चात्तु गोमतौ। न तिष्ठति छिनत्त्येव लक्ष्यं वेगेन निर्भरम्। प्रारब्धं बलवत्तरं खलु विदां भोगेन तस्य क्षयः सम्यग्ज्ञानहुताशनेन विलयः प्राक्सञ्चितागामिनाम्। ब्रह्मात्मैक्यमवेक्ष्य तन्मयतया ये सर्वदा संस्थितास्तेषां तत्त्रितयं नहि क्वचिदपि ब्रह्मैव ते निर्गुणम्। उपाधितादात्म्यविहीनकेवलब्रह्मात्मनैवात्मनि तिष्ठतो मुनेः। प्रारब्धसद्भावकथा न युक्ता स्वप्नार्थसम्बन्धकथेव जाग्रतः। न हि प्रबुद्धः प्रतिभासदेहे देहोपयोगिन्यपि च प्रपञ्चे। करोत्यहन्तां ममतामिदन्तां किन्तु स्वयं तिष्ठति जागरेण। तदाऽस्य मिथ्यार्थसमर्थनेच्छा न संग्रहस्तज्जगतोऽपि दृष्टः॥ तत्रानुवृत्तिर्यदि चेन्मृषार्थे न निद्रया मुक्त इतीष्यते ध्रुवम्। तद्वत् परे ब्रह्मणि वर्त्तमानः सदात्मना तिष्ठति नान्यदीक्षते। स्मृतिर्यथा स्वप्नविलोकितार्थे तथा विदः प्राशनमोचनादौ। कर्म्मणा निर्मितोदेहः प्रारब्धं तस्य कल्प्यताम्। नानादेरात्मनो युक्तं नैवात्मा कर्म्मनिर्मितः। अजोनित्यः शाश्वतश्च ब्रूते श्रुतिरमोघवाक्। यदात्मना तिष्ठतोऽस्य कुतः प्रारब्धकल्पना। प्रारब्धं सिध्यति तदा सदा देहात्मना स्थितिः। देहात्मभावो नैवेष्टः प्रारब्धं त्यज्यतामतः। शरीरस्यापि प्रारब्धकल्पनाभ्रान्तिरेव हि। अध्यस्तस्य कुतः सत्त्वम्? असत्यस्य कुतोजनिः?। अजातस्य कुतोनाशः? प्रारब्धमसतः कुतः?। ज्ञानेनाज्ञानकार्य्यस्य समूलस्य लयो यदि। तिष्ठत्ययं कथं देह! इति शङ्कावतो जड़ान्। समाधातुं बाह्यदृष्ट्या प्रारब्धं वदति श्रुतिः। न तु देहादिसत्यत्वबोधनाय विपश्चिताम्। परिपूर्णमनाद्यन्तमप्रमेयमविक्रियम्। एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन। सद्घनं चिद्घनं नित्यमानन्दघनमक्रियम्। एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन। प्रत्यगेकरसं पूर्णमनन्तं सर्वतोमुखम्। एकमेवाद्वयमित्यादि। अहेयमनुपादेयमनादेयमनाश्रयम्। एकमेवाद्वयमित्यादि। निर्गुणं निष्कलं सूक्ष्मं निर्विकल्पं निरञ्जनम्। एकमेवाद्वयमित्यादि। अनिरूप्यस्वरूपं यन्मनोवाचामगोचरम्। एकमेवाद्वयमित्यादि। सत्समृद्धं स्वतः सिद्धं शुद्धं बुद्धमनीदृशम्। एकमेवाद्वयमित्यादि। निरस्तरागा निरस्तभोगाः शान्ताः सुदान्ता यतयो महान्तः। विज्ञाय तत्त्वं परमं तदन्ते प्राप्ताः परां निर्वृतिमात्मयोगात्। भवानपीदं परतत्त्वमात्मनः स्वरूपमानन्दघनं विचार्य्य। विधूय मोहं स्वमनःप्रकल्पितं मुक्तः कृतार्थो भवतु प्रबुद्धः। समाधिना साधुविनिश्चलात्मना पश्यात्मतत्त्वं स्फुटबोधचक्षुषा। निःसंशयं सम्यगवेक्षितश्चेच्छ्रुतः पदार्थो न पुनर्विकल्प्यते। स्वस्याविद्याबन्धसम्बन्धमोक्षात् सत्यज्ञानानन्दरूपात्मलब्धौ। शास्त्रं युक्तिर्देशिकोक्तिः प्रमाणं चान्तःसिद्धा स्वानुभूतिः प्रमाणम्। बन्धोमोक्षश्च तृप्तिश्च चिन्तारोग्यक्षुदादयः। स्वेनैव वेद्या यज्ज्ञानं परेषामानुमानिकम्। तटस्थिता बोधयन्ति गुरवः श्रुतयो यथा। प्रज्ञयैव तरेद्विद्वानीश्वरानुगृहीतया। स्वानुभूत्या स्वयं ज्ञात्वा स्वमात्मानमखण्डितम्। संसिद्धः सन्सुखं तिष्ठेत् निर्विकल्पात्मनात्मनि। वेदान्तसिद्धान्तनिरुक्तिरेषा ब्रह्मैव जीवः सकलं जगच्च। अखण्डरूपस्थितिरेव मोक्षो ब्रह्माद्वितीये श्रुतयः प्रमाणम्"।

तदीयज्ञानाकारोऽपि तत्र दर्शितो यथा

"अकर्त्ताहमभोक्ताहमविकारोऽहमक्रियः। शुद्धबोध-